# आचार्य राधावललभा त्रिपाठीनामलङ्कारदर्शनम्

– आयुश दीक्षित

काव्यस्यस्यामोदप्रमोदके कविकर्मोल्लासलसिते विषये अलङ्कारशास्त्रिणः काव्यशास्त्रिणो वा तत्स्वरूपं निर्धारयन्ति।काव्यशास्त्रिणां मतवैभिन्यादुपलभ्यन्ते विविधप्रस्थानानि यत्र विविधैराचार्यैः काव्यतत्त्वनिर्धारणं कृतम्। तत्र रसालङ्काररीतिध्वनिवक्रोक्त्यौचित्यानि षट्–प्रस्थानान्याविर्भूतानि।प्रस्थानेष्वेतेषु माहात्म्यं कस्येति निर्धारणं प्राचीनालङ्कारिकैः विवधैः कृतम। अर्वाचीनसाहित्यशास्त्रपरम्परायामप्याचार्यैः प्रस्थानेषु कः गुरुरिति निर्धारितम। सम्प्रति स्वातन्त्र्योत्तरभारतस्यालङ्कारशास्त्रिणांचिन्तनंक्रियतेचेत् प्रमुखेष्वाचार्येषु आचार्यराधावल्लभत्रिपाठिवर्याःअन्यतमाः।एतेषाम् अलङ्कारप्रस्थानावदानोपकारकत्वं काव्यमर्मज्ञैः सहृदयैःनितरामेवानुभूयते।

एते अस्मभ्यं किञ्चिन्नूतनमेव सिद्धान्तम् "अलम्भावः" इति प्रयच्छन्ति। लोकानुकीर्तनरूपकाव्यस्यालङ्काररूपतायाऽनुभवः अलम्भावः। सिद्धान्तस्यास्योपस्थापनावसरे स्वकीये अभिनवकाव्यालङ्कारसूत्रनामा ग्रन्थे "अलम्भावस्तु पूर्णता॥" इत्युक्त्या अलम्भावमाचार्यैःनिदर्शितम्। अस्यालम्भावस्य सत्ता काव्ये एवाचार्यैः स्वीकृता। तैरुच्यते यत् अलम्भावोऽयं काव्यमेव उन्मिषति।पुनश्च प्रमातृहृद्यपि अस्यालम्भावस्य प्रत्ययः स्यादिति। अस्यालम्भावस्य अधिष्ठानं यथा कविः तथैव काव्यमपि तथैव मनुष्य चौतन्योऽपि भवति इत्याचार्यैरुच्यते।

किञ्च इत्यत्र सन्देहोत्पद्यते यदलम्भावस्त्वनुभवविषयः तेन स तु प्रमातृहृद्येव स्यात् न च काव्ये स्वाभाविकत्वेन। सर्वसामान्यमेव यत् ज्ञाता एव ज्ञेयं अनुभवति नान्यः, तत्रापि काव्यम्कथम् अलम्भावाऽख्यं भावोऽयं अनुभवितुं समर्थः? तस्मादस्य सन्देहस्य निराकरणाय आचार्याः स्वग्रन्थे अभिनवकाव्यालङ्कारसूत्रे जयरथमतमुपस्थापयन्ति–

"ननु अवभासमानत्वं प्रमातृधर्म इति कथं तदाश्रयो धर्मः काव्यालङ्कार इति चेत् असदेतत्। अवभासमानस्य त्वाभास्यनिष्ठतया प्रतीतेरर्थधर्मत्वात्।"–

विमर्शेऽस्मिन् जयरथानुसारमवभासमानत्वमवभास्यवस्तुनो धर्मः इति। येन यदवभास्यते स तस्येव धर्मः, तत्र तु किमपी भवतु प्रमाता वा अयं त्रिविधं लोकं वा। तस्माद् प्रतीतिरपि अर्थस्यैव धर्मः। तस्मादाचार्यैः स्वीक्रियते यत् काव्यमेव सर्वम् उन्मिषति।

पुनश्च अलङ्कारस्वरूपनिर्णयावसरे अभिनवकाव्यालङ्कारसूत्रे आचार्यैरुल्लिख्यते–

"अलङ्कारः काव्यजीवनम्।। आधिभौतिकाधिदैविकाध्यात्मिकविश्वत्रयमुन्मील–पुरस्सरं भूषणवारणपर्याप्त्याधायकत्वमलङ्कारत्वम"।। काव्यात्मत्वमलङ्कारम् इत्याचार्याणां मतम्। विचारेऽस्मिन् अलमिति पदस्यार्थः आचार्यैः अमरकोशकारानुगुणं स्वीक्रियते। –

अलं भूषणपर्याप्तिशक्तिवारणवाचकम्

इतः पूर्वं अन्ये काव्यशास्त्रिणः अलम् इति शब्दस्य भूषणम् इति अर्थपर्यन्तं तु गताः आसन्, किञ्च आचार्यत्रिपाठिनां वैशिष्ट्यं इदमेव यत् अन्ययोः अपि द्वयोः अर्थयोः संघटनं काव्यशास्त्रे युक्तिप्रमारपुरस्सरं कृतम्।अस्यालं शब्दस्य त्रयाणामर्थानामपि(भूषणम्–वारणम्–पर्याप्तिः) सङ्गतिराचार्यमतानुसारिण्येव। सा च विश्वस्य त्रैविध्येन अस्य अलङ्कारस्यापि त्रैविध्यात् आधिभौतिकाधिदैविकाध्यात्मिकत्वात् क्रमेण आधिभौतिके भूषणस्य, आधिदैविके वारणस्य, आध्यात्मिके च पर्याप्तेः। इत्यत्र पर्याप्तिरेव पूर्णता, सैव परमावस्था। अस्याः पूर्णतायाः अनुभवमेव अलम्भावः। अयमेवालङ्कारः त्रिविधं विश्वं आधिभौतिकाधिदैविकाध्यात्मिकाख्यञ्च उन्मील्य क्रमेण भूषण–वारण–पर्याप्तेः आधानं करोति। इत्यत्र पर्याप्तिः च परमावस्था या आध्यात्मिकस्तरे आयाति। सैव पर्याप्तिश्च पूर्णता। काव्ये समग्रमेवालङ्कारः। अस्यैव भूषणवारणपर्याप्तेः परामर्शः उपमादीष्वलङ्कारेषु अलङ्कारवादिनामभिमतीयालङ्कारेषु(रस–गुण–रीत्यादिषु) च सङ्गच्छते। आचार्याणां मते यः अलङ्करोति सोऽलङ्कारो वा अलङ्कृतिरेवालङ्कारः इति। इत्यनेन साक्षादवगम्यते यत् यान्यपि

काव्यशोभातिशायिनः तत्त्वानि काव्ये दर्शितानि, तानि सर्वाण्येवालङ्कारे अन्तर्भवन्ति। अनुप्रासोपमादयो वा भवतु रस–गुण–रीत्यादयो वा। सर्वत्रैवालङ्कारः अलङ्कारस्य प्राधान्यात्।

काव्येऽलङ्कारप्रक्रियावर्णनावसरे आचार्यैः चिन्त्यते यत् भूषणं साधयन् कविः काव्ये यमकादीनामलङ्काराणां विन्यासः विधास्यति। अनुप्रासेन च काव्यशब्दान् सुशोभयति। अयमेव भूषणम् अलं शब्दस्य प्रथमोऽर्थः। पुनश्च द्वितीयार्थेन वारणेन कविः काव्ये तद्वदेव सौन्दर्यं सिद्धयति यथा शिल्पकारः पाषाणेन अभिरामाकृतिं निर्मातुम् अनपेक्षितं भागं निस्सारयति,तथैव काव्येऽपि कविः अनावश्यकान् तत्त्वान् परित्यज्यावश्यकान्तत्त्वान् स्थापयति। पुनश्च पर्याप्तिरेव काव्यस्य पूर्णावस्था। सा च अलङ्कारः।

यथोक्तमाचार्यैः त्रिपाठिवर्यैः यत्पूर्णता रूपी अलम्भावः कवि–नट–सामाजिकैःसर्वैरेवानुभूयते। अनेनावगम्यते यत् या प्रक्रिया काव्यनिर्माणस्याचार्यैर्दर्शिता तामेव सामाजिकोऽपि काव्यवीक्षणे अनुसरति। तत्र क्रमेण अलं शब्दस्य प्रथमोऽर्थः भूषणः। काव्ये भूषणं दर्शयन् सामाजिकः काव्ये अनुप्रासोपमादीनां अलङ्काराणाम् आनन्दमनुभवति। पुनः अलं शब्दस्य द्वितीयोऽर्थः वारणः।वारणः तु सामाजिकस्य प्रसङ्गे प्राबल्यमाप्नोति।यथा कविः वारणेन काव्यस्य अनावश्यकान् तत्त्वान् त्यज्यति, तथैव श्रोता वा पाठकोऽपि अनेनार्थेनैव काव्यात् अनावश्यकान् तत्त्वान् भावान् वा परित्यज्य आवश्यकान् पदार्थान् गृह्णाति। तेन सामाजिकेन स्वाभाविकत्वेनानुभूयते यत् रामादिवत्प्रवर्तितव्यम् न रावणादिवत्। न काव्येकुत्रचिदुपदिश्यते यत् कथमाचरणीयम् कथं न आचरणीयम्, अनायासेनेव काव्याद् सामाजिकस्य बुद्धिःव्यवहारज्ञानं अवधार्यति। तदनु आयाति तृतीयोऽर्थः पर्याप्तिः। अयमेव अलम्भावः। अनेनेव समेषां सामाजिकानां हृदयं परिपूर्णतामाप्नोति।

तदनु कवि–नट–सामाजिकेषु नटस्य पात्रस्य वा प्रसङ्गमायाति चेत् तत्रापि त्रयाणामेवार्थानां व्याप्तिः। तच्च– प्रथमोऽर्थः भूषणः, अनेन नटः स्वीयां वाणीं अलङ्करोति। पुनः वारणम्, अनेन नटः अन्यस्य पात्रस्य चरित्रं परित्यजति। अन्यस्य पात्रस्य भावानां वा अभिनस्य वारणं करोति। तदनुः पर्याप्तिः, अनेन तु पूर्णता नटेष्वपि आयाति। अयमेवालम्भावः।

सम्प्रति आचार्यत्रिपाठिसम्मतालङ्कारविभागस्य चिन्तनं क्रियते चेत् किञ्चित् भिन्नमेव रूपमस्माभिः दृश्यते। स च रूपमाचार्याणामेव परिकीर्तनम्। काचिन्नूतना रीतिराचार्यैः अलङ्कारविभागस्याङ्गीकृता।

अलङ्कारा द्विविधारू–आभ्यन्तराश्च बाह्याश्च।। पर्याप्ति–वारण–भूषण–प्रक्रियाभिरू आध्यात्मिकाधिदैविकाधिभौतिकभेदेन इमे पुनस्त्रिविधारू।। पुनश्च पदपदार्थवाक्य–प्रकरण–प्रबन्धगतत्वेन पञ्चविधारू।। त्रिविधाश्च शब्द–व्यापारदृशा।। (अभिनवकाव्यालङ्कारसूत्रम्)

तत्र सर्वप्रथमस्त्वाचार्याः बाह्याऽभ्यान्तरालङ्कारभेदेन अलङ्काराणां द्वैविध्यमङ्गीकुर्वन्ति। अस्मिन् आभ्यन्तरालङ्काराः तादृशाः येषां सत्तायां काव्यमुत्पद्यते परञ्च तेषां विना काव्योत्पत्तिर्न जायते। एते आभ्यन्तरालङ्काराः क्वचित् स्फुटाः क्वचिदस्फुटाः भवन्ति। किञ्च कविमानसे काव्यरचनाकाले अन्तःस्थिताः भवन्त्येव। काव्येऽपि आभ्यन्तरालङ्काराः अन्तर्भूताः भवन्ति।

बाह्याश्चालङ्काराः आभ्यन्तरापेक्षया बाह्याः भवन्ति। आचार्यैः उच्यते इत्यत्र यत् तयोः बाह्याऽभ्यान्तरयोः भेदः तिलतण्डुलवत् न करणीयः। यतः बाह्याः अप्यलङ्काराः काव्ये समवेताःतिष्ठन्ति। किञ्च सर्वत्र स्फुटाः न भवन्ति।यथा अग्नेः कान्ति ज्वालया अवच्छिन्ना भवति, तथैव बाह्यालङ्कारैः काव्ये स्थीयन्ते। तस्मात् समेषामेवालङ्काराणां काव्ये अपृथग्वर्तित्वमेव।

पुनश्चाचार्यैरलङ्कारणामन्यथाविभाजनं क्रियते। तच्च पूर्वोक्तस्य अलं शब्दस्य अमरकोशकारानुगुणार्थस्य पर्याप्ति–भूषण–वारणस्य अलङ्कारे सङ्गतित्वात्। तत्र भूषणाधायकत्वात् आधिभौतिकालङ्कारः, वारणमूलकत्वात् आधिदैविकालङ्कारः, पर्याप्त्याधायकत्वात् आध्यात्मिकालङ्कारः। व्याख्यायामाचार्यैः निगद्यते यत् "आत्मनि इति अध्यात्मम् तत्र भवा आध्यात्मिका:"अनेनावगम्यते यत् कवेः मनसि स्थिताः अलङ्काराः आध्यात्मिकाः। मुख्याश्चालङ्काराः आभ्यन्तराः प्रायः आध्यात्मिकाः एव। काव्यसंरचनायामनुभूयालङ्काराः आधिभौतिकाः आधिदैविकाः वा भवन्ति।

तदनु आचार्यैः अलङ्काराणां पुनः विभाजनं क्रियते। स च पद – पदार्थ – वाक्य – प्रकरण – प्रबन्धागतत्वेनालङ्काराः पञ्चविधाः। इत्यत्रपूर्वोक्ताः बाह्याऽभ्यन्तरालङ्काराः आधिभौतिकाधिदैविकाध्यात्मिकाश्चालङ्काराः एव पद–पदार्थ–वाक्य–प्रकरण–प्रबन्धभेदात् विभज्यन्ते। तत्र

केचन पञ्चविधेष्वेवालङ्काकारेषु गतित्वात् पञ्चविधाः। केचन तु केवलं पद–पदार्थ–वाक्य–प्रकरणेषु एव गतित्वात् चतुर्विधाः। इत्थं विभाजनेन केचन त्रिविधाः केचन द्विविधाः च भवन्ति।

अन्तिमं विभाजनमाचार्यैः शब्दव्यापारदृष्ट्या कृतम्। तत्रापि ते एवालङ्काराः अभिधया वाच्यगताः भवन्ति। केचन लक्षणामूलकत्वात् लक्षणामूलकाः अलङ्काराः भवन्ति। केचन व्यञ्जनामूलकाः च भवन्ति।

तदनु अलङ्काराणां समेषामेव लक्षणपुरस्सरं वर्णनमाचार्यैः क्रियते। यतोहि आचार्याणां अलङ्कारचिन्तनं त्वेकं महान् विषयः।तस्य च व्यापकत्वात् विस्तर भिया शोधपत्रेऽस्मिन् वर्णनं न कर्तुं शक्यते।

आचार्याणामलङ्कारदर्शनं अन्येषामाचार्याणामपेक्षया भिन्नमेव। सर्वत्र दर्शनशास्त्रनैपुण्यमाचार्याणां दरीदृश्यते। सर्वत्राचार्यैः त्रिविधस्य विश्वस्य आधिभौतिकाधिदैविकाध्यात्मिकस्य सङ्गतिरलङ्कारे क्रियते। पुनश्चाचार्यैः काव्यमेव अलङ्कारमिति स्वीक्रियते।अनुप्रासोपमादयस्तु साधारणालङ्काराः इत्याचार्यैः मन्यते। तेषां अभिनवैव रीति अलङ्कारशास्त्रमुपस्थापनस्य युक्तियुक्ता। शोधपत्रेऽस्मिन् मया मदीयाअल्पमत्याऽपि आचार्याणां राधावल्लभत्रिपाठिनामलङ्कारदर्शनस्योपस्थापनस्य लघु प्रयासो विहितः। तत्रयदि त्रुटयश्चेत् क्षम्यतामुदारहृदयाः सहृदयाः। एभिः शब्दैः शोधपत्रोऽयं सम्पूर्णतां याति।

**– शोधच्छात्रः**
**राष्ट्रियसंस्कृतसंस्थानम्**
**भोपालपरिसरः**